# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – साहित्यम् (नाट्यवर्गः)** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – नाट्यशास्त्रम् (अध्यायः - ६)** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समान गुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः कारिकयोः व्याख्या कार्या ।**

१ अल्पाभिधानेनार्थो यः समासेनोच्यते बुधैः ।
सूत्रतः सा तु विज्ञेया कारिकार्थप्रदर्शनी ॥

२ ये रसा इति पठ्यन्ते नाट्ये नाट्यविचक्षणैः ।
रसत्वं केन वै तेषामेतदाख्यातुमर्हसि ॥

३ लोकधर्मी नाट्यधर्मी धर्मीति द्विविधः स्मृतः ।

४ न भावहीनोऽस्ति रसो न भावो रसवर्जितः ।
परस्परकृता सिद्धिस्तयोरभिनये भवेत् ॥

**प्रश्नः २** आचार्यभरतस्य मतानुसारं नाट्यसङ्ग्रहं विवेचयत ।

**प्रश्नः ३** व्यभिचारिभावान् स्पष्टयत ।

**प्रश्नः ४** 'तत्र विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः ।' रससूत्रमिदं सविस्तरं विवेचयत ।

**प्रश्नः ५** नाट्यवृत्तीनां सविस्तरं विवेचनं कुरुत ।

**प्रश्नः ६ अधोलिखितेषु द्वयोः कारिकयोः व्याख्या कार्या ।**

१ इष्टवधदर्शनाद्वा विप्रियवचनस्य संश्रवाद्वापि ।
एभिर्भावविशेषैः करुणो नाम सम्भवति ॥

२ शृङ्गाराद्धि भवेद्धास्यो रौद्राच्च करुणो रसः ।
वीराच्चैवाद्भुतोत्पत्तिर्बीभत्साच्च भयानकः ॥

३ न यत्र दुःखं न सुखं न द्वैषो नापि मत्सरः ।
समः सर्वेषु भूतेषु स शान्तः प्रथितो रसः ॥

४ करचरणवेपथुस्तम्भगात्रसङ्कोचहृदयकम्पेन ।
शुष्कोष्ठतालुकण्ठैर्भयानको नित्यमभिनेयः ॥

**प्रश्नः** ७ शृङ्गाररसं सविस्तरं वर्णयत ।

**प्रश्नः** ८ हास्यरसस्य भेदान् विवेचयत ।

**प्रश्नः** ९ नाट्यशास्त्रानुसारं शान्तरसं विवेचयत ।

**प्रश्नः** १० वीररसस्य समीक्षां कुरुत ।

प्रश्नः ११ **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ सञ्चारिभावाः कति सन्ति ?
२ सात्त्विकभावान् लिखत ।
३ नाट्याश्रिताः अभिनयाः कति सन्ति ?
४ आतोद्यं कतिविधम् ?
५ ध्रुवागानस्य भेदान् लिखत ।
६ अद्भुतरसस्य स्थायिभावः कः ?
७ 'रसो न प्रतीयते नोत्पद्यते नाभिव्यज्यते' इति कस्य मतमस्ति ?
८ वीररसात् अन्यस्य कस्य रसस्योत्पत्तिः भवति ?
९ शृङ्गाररसस्य वर्णः कः ?
१० बीभत्सरसस्य अधिदेवता का ?
११ क्रोधः कस्य रसस्य स्थायिभावः वर्तते ?
१२ अद्भुतरसः कतिविधः ?
१३ नाट्यशास्त्रस्य षष्ठमाध्यायस्य मुख्यवर्ण्यविषयः कः ?
१४ स्थायिभावान् लिखत ।
१५ षड्जादयः स्वराः कति सन्ति ?

****